स्वेन रूपेण निरूपणीयं कुर्व्वन्तीति यावत् विषयाः पृथिव्यादयः सुखादयश्च अस्मदादीनामविषयाश्च तन्मात्रलक्षणा योगिनामूर्द्ध्वस्रोतसाञ्च विषयाः। विषयं विषयं प्रति वर्त्तते इति प्रतिविषयमिन्द्रियवृत्तिश्च सन्निकर्षः अर्थसन्निकृष्टमिन्द्रियमित्यर्थः तस्मिन्नध्यवसायस्तदाश्रितइत्यर्थः अध्यवसायश्च बुद्धिव्यापारो ज्ञानम्। उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्वसमुद्रेकः सोऽध्यवसायइति वृत्तिरिति ज्ञानमिति चाख्यायते इदं तावत् प्रमाणम्। अनेन यश्चेतनाशक्तेरनुग्रहस्तत् फलं प्रमाबोधः। बुद्धितत्त्वं हि प्राकृतत्वादचेतनमिति तदीयोऽध्यवसायोऽप्यचेतनो घटादिवत्, एवं बुद्धितत्त्वस्य सुखादयोऽपि परिणामभेदा अचेतनाः। पुरुषस्तु सुखाद्यननुषङ्गी चेतनः सोऽयं बुद्धितत्त्ववर्त्तिना ज्ञानसुखादिना तत्प्रतिविम्बितस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवतीति चेतनोऽनुगृह्यते चितिच्छायापत्त्या चाचेतनापि बुद्धिस्तदध्यवसायोऽपि चेतन इव भवतीति। तथा च वक्ष्यति "तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम्। गुणकर्त्तृत्वेऽपि तथा कर्त्तेव भवत्युदासीनः" इति। अत्राध्यवसायग्रहणेन संशयं व्यवच्छिनत्ति संशयस्य अनवस्थितग्रहणेनानिश्चितरूपत्वात् निश्चयोऽध्यवसाय इत्यनर्थान्तरम्। विषयग्रहणेन चासद्विषयं विपर्य्ययमपाकरोति, प्रतिग्रहणेन चेन्द्रियार्थसन्निकर्षसूचनादनुमानस्मृत्यादयः पराकृता भवन्ति। तदेवं समानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषयाध्यवसाय इति दृष्टस्य सम्पूर्णं लक्षणम्" तत्त्वकौ०।

**दृष्टदोष** त्रि० दृष्टो दोषः रागलोभादिर्यस्य। १ज्ञातरागलोभादिरूपदोषके "न दृष्टदोषाः कर्त्तव्या न व्याध्यार्त्ता न दूषिताः" साक्षिकरणनिषेधे मनुः। दृष्टो दोषो मिथ्याज्ञानजन्यवासना यत्र। २ज्ञातमिथ्याज्ञानजन्यवासनायुक्तविषये "दृष्टदोषेऽपि विषये ममत्वाकृष्टचेतनः" देवीमा०। दृष्टो ज्ञातो दोषो येन। ३छिद्रावलोकके रिपौ

**दृष्टपृष्ठ** त्रि० दृष्टम् प्रतियोधैः पृष्ठमस्य। पलायमाने शब्दार्थचि०। रणात् पराङ्मुखस्य शत्रुभिः पृष्ठस्य दर्शनात् तथात्वम्।

**दृष्टप्रत्यय** त्रि० दृष्टेन दर्शनेन प्रत्ययः विश्वासो यस्य। अन्यत्र दर्शनेन कृतदृढनिश्चये।

**दृष्टरजस्** स्त्री दृष्टं रज आर्त्तवं यया। १दृष्टरजस्कायां नार्य्याम् अमरः। २तदुपलक्षितायां मध्यमायां प्रौढायाम् स्त्रियां राजनि०।

**दृष्टान्त** पु० दृष्टोऽन्तः विषयपरिच्छेदो यत्र। गौ० सूत्रोक्तेषु षोडशसु पदार्थेषु मध्ये पदार्थभेदे तल्लक्षणं तत्रोक्तं यथा "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" सू० "लोकसामान्यमनतीता लौकिका नैसर्गिकं वैनयिकं बुद्ध्यतिशयमप्राप्तास्तद्विपरीताः परीक्षकास्तर्केण प्रमाणैरर्थं परीक्षितुमर्हन्तीति, यथा यमर्थं लौकिका बुध्यन्ते तथा परीक्षका अपि सोऽर्थो दृष्टान्तः। दृष्टान्तविरोधेन हि प्रतिषेद्धव्या भवन्तीति। दृष्टान्तसमाधिना च स्वपक्षाः स्थापनीया भवन्तीति तदुक्तावयवेषु चोदाहरणाय कल्पत इति" वात्स्या० भा०। २तत्रोक्तावयवमध्ये उदाहरणे च तल्लक्षणं तत्रोक्तं तच्च उदाहरणशब्दे ११६४ पृ० दर्शितम् अधिकमत्र तत्सूत्रभाष्यं प्रदर्श्यते यथा "साध्यसाधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणम्" गौ० सू० "साध्येन साधर्म्यं समानधर्मता साध्यसाधर्म्यात् कारणात् तद्धर्मभावी दृष्टान्त इति तस्य धर्मस्तद्धर्मः तस्य साध्यस्य, साध्यञ्च द्विविधम् धर्म्मिविशिष्टो वा धर्मः शब्दस्यानित्यत्वम्। धर्म्मविशिष्टो वा धर्म्मी अनित्यः शब्द इति, इहोत्तरन्तद्ग्रहणेन गृह्यत इति कस्मात्? पृथग्धर्म्मवचनात्। तस्य धर्म्मस्तद्धर्म्मस्तस्य भावस्तद्धर्म्मभावः स यस्मिन् दृष्टान्ते वर्त्तते स दृष्टान्तः साध्यसाधर्म्यात् तद्धर्म्मभावी भवति स चोदाहरणमिष्यते तत्र यदुत्पद्यते तदुत्पत्तिधर्म्मकम् यच्च भूत्वा न भवति आत्मानं जहाति निरुध्यत इत्यनित्यम्। एवमुत्पत्तिधर्म्मकत्वं साधनमनित्यत्वं साध्यं सोऽयमेकस्मिन् द्वयोर्धर्म्मयोः साध्यसाधनभावः साधर्म्याद्व्यवस्थित उपलभ्यते तं दृष्टान्ते उपलभमानः शब्देऽप्यनुमिनोति शब्दोऽप्युत्पत्तिधर्मकत्वादनित्यः स्थाल्यादिवदित्युदाह्रियते तेन धर्मयोः साध्यसाधनभाव इत्युदाहरणम्" भा० "तद्विपर्य्ययाद्वा विपरीतम्" गौ० सू० "दृष्टान्त उदाहरणमिति प्रकृतं, साध्यवैधर्म्यात् तद्धर्मभावी दृष्टान्त उदाहरणमिति। अनित्यः शब्द उत्पत्तिधर्मकत्वात् यथा अनुत्पत्तिधर्मकं नित्यमात्मादि सोऽयमात्मादिदृष्टान्तः साध्यवैधर्म्यादनुत्पत्तिधर्मकत्वादतद्धर्मभावी योऽसौ साध्यस्य धर्मोऽनित्यत्वं स तस्मिन् भवतीति। अत्रात्मादौ दृष्टान्ते उत्पत्तिधर्मकत्वस्याभावादनित्यत्वं न भवतीति उपलभमानः शब्दे विपर्य्ययमनुमिनोति उत्पत्तिधर्मकत्वस्य भावादनित्यः शब्द इति साध-